**त्रिगर्त्त** पु० त्रीणि गर्त्तानि यत्र। १जालन्धरे देशे हेमच०। स च देशः वृ०स०१४अ० कूर्मविभागे उत्तरस्यामुक्तः“उत्तरतः कैलास”इत्युपक्रमे “आदर्शान्तर्द्वीपित्रिगर्त्ततुरगाननाश्वमुखाः” सोऽस्याभिजनः, तस्य राजा वा अण्। त्रैगर्त्त पित्रादिक्रमेण तद्देशवासिनि तन्नृपे च बहुषु अणो लुक्। २तत्रार्थे ब०व०। “द्रविड़ाम्बष्ठत्रिगर्त्तसौराष्ट्रान्” वृ० स० ९अ०। “सुशर्मा च नरव्याघ्र! त्रिगर्तः प्रस्थलाधिपः” भा० द्रो० १७अ०। आर्षत्वात् एकत्वेऽपि अणो लुक्। “मद्रराजस्य बलवान् त्रिगर्त्तानाधीश्वरः” हरिवं०९१ अ०। स्वार्थे क। तत्रार्थे त्रिका०।

**त्रिगर्तषष्ठ** पु० ब० व० त्रिगर्त्तः षष्ठो वर्गो यस्य। १आयुजीविसंघभेदे स च संघः सि० कौ० उक्तो यथा “आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी। क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः” “दामन्यादित्रिगर्त्तषष्ठाच्छः”पा० स्वार्थे तेभ्यः छ। कौण्डोपरथीय इत्यादि।

**त्रिगर्त्ता** स्त्री त्रयो योनिस्था गर्त्ताः अस्याः। कामुकयङ्गनायां मेदि०। एकयोनिकाया अपि तस्या मैथुनाचरणे त्रियोनिकतुल्यत्वात्तथात्वम्।

**त्रिगुण** न०त्रयाणां सत्त्वरजस्तमसां गुणानां समाहारः। समाहृता वा त्रयो गुणाः,त्रयोगुणा अस्य वा। सांख्यमतसिद्धे साम्यावस्थापन्नगुणत्रयात्मके १प्रधाने। “त्रिगुणमविवेकिविषयं सामान्यमचेतनं प्रसवधर्मि” सा० कौ० “त्रिगुणं त्रयो गुणाः सुखदुःखमोहा अस्येति त्रिगुणं तदनेन सुखादीनामात्मगुणत्वं पराभिमतमपाकृतम्”त०कौ०“शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम्। त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम्”विष्णुपु०“सत्त्वरजस्तमसां साम्यवस्था प्रकृतिः प्रकृतेर्महान्महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः” सा० सू० “सत्त्वादीनि द्रव्याणि न वैशेषिकवद्गुणाः संयोगवत्त्वात्, लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च। तेष्वत्र शास्त्रे स्मृत्यादौ च गुणशब्दः पुरुषोपकरणत्वात्पुरुषपशुबन्धकत्रिगुणात्मकमहदादिरज्जुनिर्मातृत्वाच्च प्रयुज्यते। तेषां सत्त्वादिद्रव्याणां या साम्यावस्था न्यूनानतिरिक्तावस्था न्यूनाधिकभावेनासंहतावस्थेति यावत्। अकार्य्यावस्थेति निष्कर्षः। अकार्य्यावस्योपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः। यथाश्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसङ्गात् “सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा। एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्”इत्यादिस्मृतिभिर्गुणमात्रस्यैव प्रकृतित्ववचनाच्च। सत्त्वादीनामनुगमाय सामान्येति। पुरुषव्यावर्तनाय गुणेति। महदादिव्यावर्त्तनाय चोपलक्षितान्तमिति। महदादयोऽपि हि कार्य्यसत्त्वादिरूपाः पुरुषोपकरणतया गुणाश्च भवन्तीति। तदत्र प्रकृतेः स्वरूपमेवोक्तम्” भाष्यम् २सत्त्वादिगुणयुक्ते त्रि० “महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च। विषयाणां ग्रहीतृणि शनैः पञ्चेन्द्रियाणि च” मनुः। त्रिभिर्गुण्यते गुण–घञर्थे क। ३त्रिभिर्गुणिते त्रि० “सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य” रघुः “व्रताय मौञ्जीं त्रिगुणां बभार याम्” कुमा० “एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्। त्रिगुणं स्याद्वनस्थानां यतीनान्तु चतुर्गुणम्”मनुः। त्रयोगुणा अस्याः। ४मायायां स्त्री ५तन्नामके (ह्रीं)बीजभेदे च “वेदाद्यां त्रिगुणां रमामथ वदेत् कामेन संसेविताम्” तन्त्रसा० श्रीविद्यामन्त्रभेदोक्तौ ६त्रिशिखे त्रिशूले “त्रिगुणपरिवारप्रहरणः” किरा०। “त्रिगुणः त्रिशिखः परिवार आकारो यस्य” मल्लि०। कर्णशब्दे परेऽस्य लक्षणपरत्वे दीर्घत्वम् त्रिगुणौ कर्णौ अस्य। त्रिगुणाकर्ण तथा लक्षणयुक्ते त्रि०।“पदैस्त्रिभिर्वलिर्वद्धो रागादि त्रिपदाथ वा। उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता” देवीपु० ४५ अ० उक्तेः ७ दुर्गायां स्त्री।

**त्रिगुणाकृत** त्रि० त्रिगुणं कृत्वा कृष्टं डाच् कृ–क्त। त्रिधाहलेन कृष्टे क्षेत्रादौ अमरः।

**त्रिगुणात्मक** न० त्रयो गुणाः तेजोबन्नरूपा आत्मानोऽस्य। अज्ञाने।“गुणाश्च लोहितशुक्लकृष्णाः अज्ञानकार्य्येषु तेजोबन्नेष्ववान्तरप्रकृतिषु श्रुतिप्रसिद्धाः। तथा च कार्य्यगतत्रिरूपेण कारणमप्यज्ञानमव्यक्तात्मकं त्रिगुणात्मकम्। यद्वा रजःसत्त्वतमोलक्षणास्त्रयोगुणास्तद्युक्तमज्ञानं गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकं भवति।

**त्रिगुणित** त्रि० त्रिभिर्गुणितः। त्रिरावृत्ते।

**त्रिगुणी** स्त्री त्रयो गुणाः पत्रेऽस्याः गौरा०। विल्ववृक्षे तस्य पत्रस्य त्रिगुणात्मकत्वात्तथात्वम्। “मूलं धार्य्यं त्रिगुणत्राः सवितरि विगुणे, चौरिकामूलमिन्दौ”ज्यो०“त्रिगुणी श्रीफलवृक्षः” प्रमिता०।

**त्रिचक्र** पु० त्रीणि चक्राण्यस्य। अश्विनीकुमारयोः रथे। “अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीवाश्वो अश्विनो र्यातु सुष्टुतः” ऋ०१।१५७।२।